Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र–कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः–४७ सञ्चिका – ६४ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि प्रथमायां हस्तानक्षत्रयुक्तः सोमवासरः ०३ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

पुष्पेषु जाती पुरुषेषु विष्णुर्नारीषु रम्भा नगरीषु काञ्ची ।
नदीषु गंगा नरपेषु रामः काव्येषु माघः कवि कालिदासः॥

*Jati among flowers, Vishnu among men, Rambha among women, Kanchi among cities, Ganges among rivers, Rama among kings, Magha among poetic compositions and Kalidasa among poets excel the others.*

(नीतिसारः–१)

## गान्धिमहात्मनः स्मरणम्

प्रतिवर्षम् अक्टोबरमासस्य द्वितीये दिने गान्धीजयन्ती आचर्यते। रघुपतिराघव राजाराम पतितपावन सीताराम इति गानं क्रियते। परस्मिन् दिने सर्वं विस्मर्यते। सरलजीवनस्य सङ्केतभूतं महात्मानं कार्यानेन



आगच्छन्तः पाश्चेत्यवस्त्रधारिणः अधिकारिणः प्रशंसन्ति। तेषां वचनानि हृदयस्य अन्तरालान्नोद्गतानि, अपि तु ओष्टमात्रनिर्गतानि इति वक्तारोऽपि जानन्ति।, श्रोतारोऽपि जानन्ति।

सत्यमेव देवं मनुते स्म महात्मा। अद्य को नायकः आत्मानं सत्यवादिनं वक्तुं समर्थः? सर्वत्रानृतमेव नरीनृत्यते। उत्कोचदानेन विना किमपि कार्यं न सम्पत्स्यते। सर्वेषु क्षेत्रेषु वञ्चना वरीवर्त्यते। किं वयं महात्मनो नामोच्चारयितुम् अर्हाः? अहिंसा महात्मगान्धिनो जीवायते स्म। अद्य देशेऽस्मिन् हिंसायाः ताण्डवम् एव पश्यामः। चलचित्रेषु हिंसादृश्यानि प्रभूतानि प्रदर्श्यन्ते। किमयं न महात्मविषये अस्माभिः कृतो द्रोहः? सर्वत्र अधिकारदाहेन बम्भ्रम्यमाणा अद्यतना नायकाः क्व? अधिकारस्य कणिकामपि अनपेक्ष्य प्राणान् दत्तवान् महात्मा क्व ? स्त्रियः पुरुषसमानाः, ताभ्यो गौरवं देयम्, ताः निर्भयं निशीथेऽपि चरेयुः इति महात्मा आकाङ्क्षति स्म। अद्य सर्वत्र स्त्रीणां मानभङ्गं कुर्वाणा दुःशासना एव दृश्यन्ते। मानवती स्त्री अद्य सधैर्यं वीथीषु गन्तुं बिभेति। अस्माभिः महत्मना अपेक्षितं भारतवर्षं न निर्मितम्। अद्य लज्जया अस्माभिः सर्वैः शिरो नमनीयम्।

### श्रीनिवासस्य रथोत्सवः

मैसूरु–अत्रत्ये वि.वि.मोहल्ला विस्तरणे विराजमानस्य श्री लक्ष्मीवेङ्कटरमणस्वामिनः ब्रह्म–रथोत्सवः अक्टोबरमासस्य ११तमदिने भविष्यति। प्रातः दशवादने परमपूज्यानां श्री ब्रह्मतन्त्रपरकालमठाधीशानां श्री अभिनववागीशब्रह्मतन्त्र परकाल यतीवर्याणां दिव्यसान्निध्ये प्रचलिष्यति इति देवालयस्य प्रकटनं सूचयति। प्रथम दिनाङ्कतः अङ्कुरार्पणादि कार्यक्रमाः प्रारप्स्यन्ते इति सूचयति।

### जलनिर्वाणमण्डली

नवदिल्ली–कावेरीजलविवादं परिहर्तुं सर्वोच्चन्यायालयो जल–निर्वहणमण्डलीं स्थापयितुं शुक्रवारे आदेशम् अकरोत्। केन्द्र सर्वकारेण मण्डली शीघ्रमेव रचनीया। मण्डल्याः सदस्याः कर्णाटकराज्यं गत्वा तत्रत्यां परिस्थितिं परीक्षेरन्, प्रणिगदनं सर्वोच्चन्यायालयाय अक्टोबर–मासस्य षष्ठे दिने दद्युः इति सर्वोच्चन्यायालयस्य आदेशः।

### जयारोग्यस्थितिः उत्तमः

चेन्न–मुख्यसचिवा जयललितायाः आरोग्य स्थितिः उत्तमः इति अवगम्यते ।

## विश्वविख्यात दसरामहोत्सवस्य उद्घाटनम्

मैसूरु–मैसूरुनगरस्य चामुण्डाशैले मध्याह्ने १२.१० घण्टायां कर्णाटकस्य श्रेष्ठः ज्येष्ठः कविः नाडोजपम्पप्रशस्तिभाक् डा. चन्नवीरकणविः चामुण्डाम्बां पुष्पैरभ्यर्च्य मैसूरुदसरामहोत्सवं समुद्घाटयामास। चन्नवीरकणविः भाषमाणः कर्णाटकराज्यस्य महादायीकावेरीनद्योः जलप्रवहण – विषये बहुभ्यः वर्षेभ्यः अन्याय्यान्येव सम्भवन्ति समागच्छन्ति। महादायीजलविवादे कावेरीनदीजलविवादे शासकाङ्ग–न्यायङ्गाभ्यां कर्णाटकस्य आनुकूल्यानि नैव समभवन्। सर्वदा कन्नडजनाः अन्याय्यानि अनुभवन्तः शान्त्या सोढन्तस्सन्ति। उत्तरत्राणि कर्णाटकजनेभ्यः न्यायान् प्रदापयेयुः सर्वे प्रशासकाः। माता चामुण्डाम्बा कन्नडजनान् जलादिसमस्याभिः मोचयेत्। सा माता सर्वेभ्यः सुखसम्पदाः शान्ति च प्रदास्यत्विति उवाच। मुख्यातिथि रूपेण समागतः मुख्यमन्त्री सिद्धरामय्यः देवी पुष्पैरभ्यर्च्य ततः भाषमाणः कर्णाटकराज्ये अधुना विषमपरिस्थितिरस्ति। इमां विषमपस्थितिमतिक्रम्य सुखस्थितिं समागन्तुं जननी चामुण्डा शक्तिं ददातु । सा सर्वान् रक्षतु। कन्नड–देशस्य अभिवृद्ध्यै वयं सर्वे प्रयतावहैः। कावेरीनदीजलविवादः प्राचीनतमः शासकाः मिथः चर्चित्वा कावेरीजलप्रवहण विषये निर्णयमेकं स्वीचक्रुः। १९२४ वर्षे अन्यः कश्चनाङ्गीकारः स्वीकृतः। वारं वारं कर्णाटकमुपरि अन्यय्य–सरणिः पतन्ती वर्तत एव । अन्ताराष्ट्रिय अन्ताराज्यजल–विवादेषु न कदापि मध्यकालीना देशान् न्यायाधीशः नैव चक्रुः। परं कावेरीजलविचारे एषः मध्यकालीन देशः कृतः। कावेरीन्यायाधि–करणादेश प्रकटनानन्तरं येषु वर्षेषु वृष्टिरधिकप्रमाणेन पतिताः तेषु वर्षेषु अधिकप्रमाणं जलं तमिळु–नाडुराज्यमेव प्रावहत्। अस्मिन् वर्षेऽपि पर्याप्तावृष्टि नैव पतिता। पञ्चसु वर्षेषु पर्याप्तप्रमाणैः वृष्टिः नैवापतत्। कपिलाजलानयनस्थलेषु ५०शतांशप्रमाणेन जलक्षाम–समुत्पन्नः। कोडगुमण्डले हेमावती नदीतटस्थलेषु हारङ्गिजलानयन प्रदेशेषु पर्याप्तप्रमाण वृष्टि। नैव पतिता। अस्माकं जलाशयान् २५७ टिएम्सिजलमागच्छेत् परं १२९ टिएम्सि प्रमाणं जलं पतितम्। ४८ शतांशप्रमाणेन अनावृष्टिस्समुत्पन्ना। एवं स्थिते कथं तमिळुनाडुराज्योप जलं प्रदातुं शक्यते। अथापि ते तमिळुनाडुजनाः जलं प्रवाहयेत् इति क्रोशन्त एव सन्ति। चामुण्डाम्बा मामानुगृह्णातु इति प्रार्थितवान् ।

### लालबहादुरशास्त्रिजयन्ती

नवदिल्ली–भारतवर्षस्य भूतपूर्वः प्रधानमन्त्री लालबहादुरशास्त्री अक्टोबरमासस्य द्वितीये दिने जातः। तस्मिन्नेव दिने गान्धिजयन्ती भवतीति कारणाज्जनैः शास्त्री विस्मर्यते। किन्तु शास्त्री समस्तजन–स्मरणीयः। तस्य मूर्तिरल्पीयसी आसीत्, किन्तु कीर्तिरधिका। शास्त्रिसदृशा जना विरला लोके। स्वार्थं विना देशसेवां सोऽकार्षीत्। तस्य स्मरणं देशभक्तिम् उत्तेजयति। नमो लालबहादुरशास्त्रिणे।

### उपन्यासमालिका

मैसूरु–श्री वेङ्कटेशसभा संस्थायाः आश्रये श्री वेदान्तदेशिकानां उपन्यासमालिका मासस्यास्य २० तः २४ तम दिनाङ्कपर्यन्तं सायं ६ वादनतः अष्टवादनपर्यन्तं मैसूरु पुस्तकं सन्तानगोपालस्वामि देवालये प्रचलिष्यति इति प्रकटनं सूचयति। प्रवचनकारः तिरुनाहै वीरराघवाचार्यस्वामिनः । सर्वेभ्य स्वागतं प्रार्थयति ।

### दशरात्रोत्सवस्यारम्भः

मैसूरु–दशरात्रोत्सवस्यारम्भः। कलाविदो नानाविधां प्रतिभां प्रदर्शयितुम् उद्यताः। किन्तु कावेरी विवादस्य सान्द्रा छाया प्रवासिनाम् उत्साहं तनयति । बहवः पूर्वमेव वसतिगृहेषु कृता–रक्षणा अपि इदानीं मैसूरुनगरम् आगन्तुं नोत्सहन्ते । अनेन कारणेन वणिजां वित्तहानि–र्भवेदिति शङ्का जाता।

## महात्मनः गान्धेः जयन्ती



''ममायं विचारोऽस्ति यद् भारते कश्चिदपि भारतीयः असंस्कृतज्ञो न भवेत् । भारतीयास्तु संस्कृतेन विना असंस्कृता एव ।''

''साधारम्''– महात्मा गान्धी एवं घोषितवतः दीनदलितानां बन्धोः राष्ट्रपिता इति सुविख्यातस्य महात्मनः गान्धेः जन्मदिनमहोत्सवः देशे सर्वत्र महता वैभवेन आचरितः।

### श्रीचामुण्डाम्बिकायाः रथोत्सवः

मैसूरु – श्री चामुण्डाम्बिकायाः वार्षिक रथोत्सवः मासस्यास्य पञ्चदशतम दिनाङ्के शनिवासरे प्रातः संभविष्यमाणे शुभलग्ने प्रचलिष्यति। महाराणी श्रीमती प्रमोदादेवी प्रथमापूजां च करिष्यति।

### मुख्यसचिवेन पूजा

मैसूरु–विश्वविख्यात दसरा–महोत्सवस्य विजयदशमी यात्रा पूजाः मङ्गळवासरे मुख्यसचिवेन श्री सिद्धरामय्यमहोदयेन अपराह्ने २.१६ तथा २.०० तमसमये नन्दिपूजां करिष्यति इति मण्डलसचिवः श्रीहेच्.पि. महदेवप्पः पत्रकारान् उद्दिश्य अवोचत्। कार्यक्रमे राज्यसचिव सम्पुट सहद्योगिः उपस्थिताः इति अवोचत्।

### प्रख्यातो मनोवैद्यो दिवङ्गतः

शिवमोग्गा–प्रख्यातो मनोवैद्यो डा. अशोकपैमहाभागः गुरुवारस्य मध्यरात्रे स्काट्लेण्ड्देशे मृतः। विचारसङ्किरणे भागं वोढुं पत्न्या डा. रजन्या साकं स्काट्लेण्ड्देशं गतः वैद्यमहाभागः हृदयाघातेन सहसा मृत इति श्रूयते। सप्तति–वर्षवयाः डा.अशोकपैमहाभागः नानाप्रशस्तीनां भाजनम् आसीत्। मनोरोगिणां धन्वन्तरिव स सामाजिकं कार्यं करोति स्म ।

*बेङ्गळूरु–कावेरीनदीप्रवहणविषये विधानसभायाः विशेषाधिकवेशनं अद्य प्रचलिष्यति। मुख्यमन्त्री सिद्धरामय्यः पत्रकारान् उद्दिश्य अब्रवीत्।